# Shri Tanatulasidasacharyapranita Dharmashikshavalih

# શ્રીતનતુલસીદાસાચાર્યપ્રણીતા ધર્મશિક્ષાવલિઃ

## Document Information

Text title : Shri Tanatulasidasacharyapranita Dharmashikshavalih

File name : dharmashikShAvaliHtanatulasIdAsAchArya.itx

Category : raama, rAmAnanda, advice, upadesha

Location : doc_raama

Author : tanatulasIdAsAchArya

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : From Chatuh Sampradaya Dig-Darshanm

Latest update : December 3, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 3, 2023

*sanskritdocuments.org*

# શ્રીતનતુલસીદાસાચાર્યપ્રણીતા ધર્મશિક્ષાવલિઃ

પ્રણમ્ય ભાષ્યકૃદ્રામાનન્દં રામં ગુરું તથા ।
ધર્મબોધાય કુર્વેઽહં ધર્મશિક્ષાવલીં શુભામ્ ॥ ૧॥

સર્વાત્મા ચ મતો રામસ્તદ્દેહાઃ સર્વ એવ હિ ।
સમાદૃત્ય તતઃ સર્વાન્ સુખિનઃ સર્વથા કુરુ ॥ ૨॥

અહિંસાસદૃશો ધર્મો લોકે વેદે ચ નાસ્તિ તત્ ।
અહિતં કસ્યચિત્ ક્વાપિ કદાચિદપિ નો કુરુ ॥ ૩॥

સત્યં હિ પરમો ધર્મઃ સર્વં સત્યે પ્રતિષ્ઠિતમ્ ।
મનસા કર્મણા વાચા સદા સત્યં સમાચર ॥ ૪॥

ઇન્દ્રિયાણાં સમૂહં ચ વિષયાદ્ વિનિવર્ત્ય હિ ।
શ્રીમદ્રામસ્ય કૈઙ્કર્યે સર્વદા વિનિયોજય ॥ ૫॥

સર્વેષાં હિતકર્ત્તા ચ સ્વામી રામઃ પરેશ્વરઃ ।
તસ્ય સર્વાત્મનો જીવો દાસોઽણુઃ ચેતનો વપુઃ ॥ ૬॥

અદ્વિતીયો જગદ્ધેતૂ રામો દિવ્યવપુર્ગુણઃ ।
સર્વેષાં રક્ષકશ્ચાથ ભક્ત્યા મુક્તિપ્રદાયકઃ ॥ ૭॥

સ્વસ્ય દાસ્યં ચ રામસ્ય સ્વામિતાં સ્મર નિત્યશઃ ।
બદ્ધતાં સ્વસ્ય રામસ્ય મોચકત્વં ચ ભાવય ॥ ૮॥

ત્વાં ત્વદીયં ચ સર્વં હિ શ્રીમદ્રામસ્ય ચિન્તય ।
સ્વીય તથા નિજાત્માનં શ્રીમદ્રામાય ચાર્પય ॥ ૯॥

સ્વસ્યાહિતવિધાતારં પ્રતિ હિતં સમાચર ।
દેહેન મનસા વાચા સર્વદૈવ શુચિર્ભવ ॥ ૧૦॥

રામભક્તૈર્ન કર્ત્તવ્યા ચિન્તાભોજનવસ્ત્રયોઃ ।
યતો વિશ્વમ્ભરો રામો નૈવ ભક્તાનુપેક્ષતે ॥ ૧૧॥

પૂર્વાચાર્યપ્રબન્ધાનાં સર્વદા ચિન્તનં કુરુ ।
રામાયણાદિપાઠં ચ કુરુ નિત્યં હિ શ્રદ્ધયા ॥ ૧૨॥

મુનિભિઃ સર્વશાસ્ત્રૈશ્ચ નિશ્ચિતમેતદેવ હિ ।
જ્ઞેયો ધ્યેયશ્ચ ગેયશ્ચ સીતાનાથોઽખિલેશ્વરઃ ॥ ૧૩॥

આચાર્યસહિતૌ સીતારામૌ પૂજ્યૌ ચ સર્વદા ।
સાયં પ્રાતશ્ચ રામસ્ય સ્તુતિઃ કાર્યા મુમુક્ષણા ॥ ૧૪॥

રામં ચ રામભક્તાઁશ્ચ યે નમન્તિ સદા ભુવિ ।
સન્તિ તે માનવા દેવા નમસ્કાર્યા હિ તેઽનિશમ્ ॥ ૧૫॥

સર્વેષુ રમમાણં હિ રામં સ્મરતિ યઃ સદા ।
યજ્ઞો દાનં તપશ્ચાત્ર સન્તુ તસ્ય ન વા ભુવિ ॥ ૧૬॥

ન ચ રામાત્ પરં નામ ન મન્ત્રસ્તારકાત્ પરઃ ।
શ્રીરામાન્ન પરો દેવઃ શાસ્ત્રં વેદાત્ પરં ન હિ ॥ ૧૭॥

રામં બ્રહ્મ વિહાયાત્ર પરસ્યોપાસનં ચ યત્ ।
જાહ્નવ્યાશ્ચ જલં ત્યક્ત્વા પાનં કૂપજલસ્ય તત્ ॥ ૧૮॥

લાભસ્તસ્ય જયસ્તસ્ય નૈવ તસ્ય પરાજયઃ ।
રામઃકમલપત્રાક્ષો વિષયો યસ્ય સંસ્મૃતેઃ ॥ ૧૯॥

શ્રીતનતુલસીદાસદ્વારાચાર્યેણ નિર્મિતા ।
ધર્મશિક્ષાવલી ભૂયાદ્ ધર્મતત્ત્વાવબોધિની ॥ ૨૦॥

ઇતિ શ્રીતનતુલસીદાસાચાર્યપ્રણીતા ધર્મશિક્ષાવલિઃ સમ્પૂર્ણા ।

Encoded and proofread by Mrityunjay Pandey

*Shri Tanatulasidasacharyapranita Dharmashikshavalih*

pdf was typeset on December 3, 2023

Please send corrections to *sanskrit@cheerful.com*